# Ekatmata Stotra – सम्पूर्ण संस्कृत पाठ

ॐ सच्चिदानन्दरूपाय नमोऽस्तु परमात्मने।
ज्योतिर्मयस्वरूपाय विश्वमाङ्गल्यमूर्तये ॥ १ ॥

प्रकृतिः पञ्चभूतानि ग्रहा लोकाः स्वरास्तथा।
दिशः कालश्च सर्वेषां सदा कुर्वन्तु मङ्गलम् ॥ २ ॥

रत्नाकराधौतपदां हिमालयकिरीटिनीम्।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ॥ ३ ॥

महेन्द्रो मलयः सह्यो देवतात्मा हिमालयः।
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ॥ ४ ॥

गङ्गा सरस्वती सिन्धुर्ब्रह्मपुत्रश्च गण्डकी।
कावेरी यमुना रेवा कृष्णा गोदा महानदी ॥ ५ ॥

अयोध्या मथुरा माया काशीकाञ्ची अवन्तिका।
वैशाली द्वारिका ध्येया पुरी तक्षशिला गया ॥ ६ ॥

प्रयागः पाटलीपुत्रं विजयानगरं महत्।
इन्द्रप्रस्थं सोमनाथः तथा अमृतसरः प्रियम् ॥ ७ ॥

चतुर्वेदाः पुराणानि सर्वोपनिषदस्तथा।
रामायणं भारतं च गीता सद्दर्शनानि च ॥ ८ ॥

जैनागमास्त्रिपिटकाः गुरुग्रन्थः सतां गिरः।
एषः ज्ञाननिधिः श्रेष्ठः श्रद्धेयो हृदि सर्वदा ॥ ९ ॥

अरुन्धत्यनसूया च सावित्री जानकी सती।
द्रौपदी कण्णगी गार्गी मीरा दुर्गावती तथा ॥ १० ॥

लक्ष्मीरहल्या चन्नम्मा रुद्रमाम्बा सुविक्रमा।
निवेदिता सारदा च प्रणम्या मातृदेवताः ॥ ११ ॥

श्रीरामो भरतः कृष्णो भीष्मो धर्मस्तथार्जुनः।
मार्कण्डेयो हरिश्चन्द्रः प्रह्लादो नारदो ध्रुवः ॥ १२ ॥

हनुमान् जनको व्यासो वसिष्ठश्च शुको बलिः।
दधीचिविश्वकर्माणौ पृथुवाल्मीकिभार्गवाः ॥ १३ ॥

भगीरथश्चैकलव्यो मनुर्धन्वन्तरिस्तथा।
शिविश्च रन्तिदेवश्च पुराणोद्गीतकीर्तयः ॥ १४ ॥

बुद्धा जिनेन्द्रा गोरक्षः पाणिनिश्च पतञ्जलिः।
शङ्करो मध्वनिंबार्कौ श्रीरामानुजवल्लभौ ॥ १५ ॥

झूलेलालोऽथ चैतन्यः तिरुवल्लुवरस्तथा।
नायन्मारालवाराश्च कंबश्च बसवेश्वरः ॥ १६ ॥

देवलो रविदासश्च कबीरो गुरुनानकः।
नरसिस्तुलसीदासो दशमेशो दृढव्रतः ॥ १७ ॥

श्रीमत् शङ्करदेवश्च बन्धू सायणमाधवौ।
ज्ञानेश्वरस्तुकारामो रामदासः पुरन्दरः ॥ १८ ॥

बिरसा सहजानन्दो रामानन्दस्तथा महान्।
वितरन्तु सदैवैते दैवीं सद्‌गुणसंपदम् ॥ १९ ॥

भरतर्षिः कालिदासः श्रीभोजो जकणस्तथा।
सूरदासस्त्यागराजो रसखानश्च सत्कविः ॥ २० ॥

रविवर्मा भातखण्डे भाग्यचन्द्रः स भूपतिः।
कलावंतश्च विख्याताः स्मरणीया निरन्तरम् ॥ २१ ॥

अगस्त्यः कंबुकौण्डिन्यौ राजेन्द्रश्चोलवंशजः।
अशोकः पुश्यमित्रश्च खारवेलः सुनीतिमान् ॥ २२ ॥

चाणक्यचन्द्रगुप्तौ च विक्रमः शालिवाहनः।
समुद्रगुप्तः श्रीहर्षः शैलेन्द्रो बप्परावलः ॥ २३ ॥

लाचिद्भास्करवर्मा च यशोधर्मा च हूणजित्।
श्रीकृष्णदेवरायश्च ललितादित्य उद्बलः ॥ २४ ॥

मुसुनूरिनायकौ तौ प्रतापः शिवभूपतिः।
रणजित्सिंह इत्येते वीरा विख्यातविक्रमाः ॥ २५ ॥

वैज्ञानिकाश्च कपिलः कणादः सुश्रुतस्तथा।
चरको भास्कराचार्यो वराहमिहिरः सुधीः ॥ २६ ॥

नागार्जुनो भरद्वाजः आर्यभट्टो वसुर्बुधः।
ध्येयो वेंकटरामश्च विज्ञा रामानुजादयः ॥ २७ ॥

रामकृष्णो दयानन्दो रवीन्द्रो राममोहनः।
रामतीर्थोऽरविंदश्च विवेकानन्द उद्यशाः ॥ २८ ॥

दादाभाई गोपबन्धुः तिलको गान्धिरादृताः।
रमणो मालवीयश्च श्रीसुब्रह्मण्यभारती ॥ २९ ॥

सुभाषः प्रणवानन्दः क्रान्तिवीरो विनायकः।
ठक्करो भीमरावश्च फुले नारायणो गुरुः ॥ ३० ॥

संघशक्तिप्रणेतारौ केशवो माधवस्तथा।
स्मरणीयाः सदैवैते नवचैतन्यदायकाः ॥ ३१ ॥

अनुक्ता ये भक्ताः प्रभुचरणसंसक्तहृदयाः।
अनिर्दिष्टा वीराः अधिसमरमुद्ध्वस्तरिपवः।
समाजोद्धर्तारः सुहितकरविज्ञाननिपुणाः।
नमस्तेभ्यो भूयात् सकलसुजनेभ्यः प्रतिदिनम् ॥ ३२ ॥

इदमेकात्मतास्तोत्रं श्रद्धया यः सदा पठेत्।
स राष्ट्रधर्मनिष्ठावान् अखण्डं भारतं स्मरेत् ॥ ३३ ॥

॥ भारत माता की जय ॥

## Ekatmata Stotra Transliteration

**Om Saccidanandarupaya namo'stu Paramatmane**
**Jyotirmayasvarupaya Vishvamangalyamurtaye || 1 ||**

**Prakritih Pancabhutani graha lokah svarastatha**
**Dishah kalashca sarvesham sada kurvantu mangalam || 2 ||**

**Ratnakaradhautapadam Himalayakiritanim**
**Brahmarajarsiratnaadhyam vande Bharatamataram || 3 ||**

**Mahendro Malayah Sahyo devatamna Himalayah**
**Dhyeyo Raivatako Vindhyo girishcaravalistatha || 4 ||**

**Ganga Sarasvati Sindhurbrahmaputrashca Gandaki**
**Kaveri Yamuna Reva Krishna Goda Mahanadi || 5 ||**

**Ayodhya Mathura Maya Kashikanci Avantika**
**Vaishali Dvarika dhyeya Puri Takshashila Gaya || 6 ||**

**Prayagah Pataliputram Vijayanagarim mahat**
**Indraprastham Somanathah tatha Amrtasarah priyam || 7 ||**

**Caturvedah Puranani sarvopanisadastatha**
**Ramayanam Bharatam ca Gita saddarshananin ca || 8 ||**

**Jainagamastripirakah Gurugranthan satam girah**
**Eshah jnananidhih shreshtah shraddheyo hridi sarvada || 9 ||**

**Arundhaty Anasuya ca Savitri Janaki Sati**
**Draupadi Kannagi Gargi Mira Durgavati tatha || 10 ||**

**Lakshmirahlarya Channamma Rudramamba suvikrama**
**Nivedita Sarada ca pranamya matridevataah || 11 ||**

**Shriramo Bharatah Krishno Bhishmo DharmastathArjunah**
**Markandeyo Hariscandrah Prahlado Narado Dhruvah || 12 ||**

**Hanuman Janako Vyaso Vasishthashca Shuko Balih**
**Dadhicivishvakarmanau Prithuvalmikinbhargavah || 13 ||**

**Bhagirathashcaikalavyo Manurdhanvantaristatha**
**Shivishca Rantidepashca Puraanodgitakirtayah || 14 ||**

**Buddha Jinendra Gorakhsah Paninishca Patanjalih**
**Shankaro Madhvanimbarkau Shriramanujavallabhau || 15 ||**

**Jhulelalo'tha Chaitanyah Tiruvalluvarastatha**
**Nayanmaralavaarashca Kambbashca Basaveshvarah || 16 ||**

**Devalo Ravidaasashca Kabiro Gurunanakah**
**Narasistulasidaso Dashamesho Dridhavratah || 17 ||**

**Shrimat Shankaradevashca Bandhu Sayanamaadhavau**
**Jnaneshvarastukaaraamo Ramadasah Purandarah || 18 ||**

**Birasa Sahajananado Ramanandastatha mahan**
**Vitarantu sadaivaithe daivim sadgunasanpadam || 19 ||**

**Bharatarshih Kalidasah Shribhojo Jakanastatha**
**Suradasastyagarajo Raskhanashca satkavith || 20 ||**

**Ravivarma Bhatakhande Bhagyacandrah sa bhupatih**
**Kalavantashca viknyatah smaraniya nirantaram || 21 ||**

**Agastyah Kambukaundinyau Rajendrashcaulavamshajah**
**Ashokah Pushyamitrashe Kharavelah Suneetiman || 22 ||**

**Canakyacandraguptau ca Vikramah Shaalivahanah**
**Samudraguptah Shriharshah Shailendro Bapparavalah || 23 ||**

**Lacidbhaskaravarma ca Yashodharma ca Hunajit**
**Shrikrishnadeva Rayashca Lalitaditya Udbalah || 24 ||**

**Musunurinayakau tau Pratapah Shibabhupati**
**Ranjit Singh ityete vira vikhyataviikramah || 25 ||**

**Vairijanikashca Kapilah Kaanadah Sushrutastatha**
**Carako Bhaskaaracharyo Varahamihirah Sudhih || 26 ||**

Nagarjuno Bharadwajah Aryabhatto Vasurbudhah
Dhyeyo Venkataramashca vigyan Ramanujadayah || 27 ||

Ramakrishno Dayananado Ravindro Ramoamahanah
Ramatirtho'Aravindashca Vivekananda udyashah || 28 ||

Dadabhai Gopabhandhuh Tilako Gandhiradritah
Ramano Malaviyashca Shrisubrahmaniyabharati || 29 ||

Subhashaha Pranavananada Krantiviro Vinayakah
Thakkaro Bhimaravashca Phule Narayano Guruh || 30 ||

Sanghashaktipraneetarau Keshavo Madhavastatha
Smaraniyah sadaivaithe Navacaitanyadayakah || 31 ||

Anuktah ye Bhaktah Prabhuchaaranasamsaktahridayah
Anirdishtha Virah Adhisamaramudhvastharipavah
Samajoddhartarah Suhitakaravijnaananipunah
Namastebhyo bhuyat sakalasujanebyah pratidinaam || 32 ||

Idamekatmatastoram shradddhaya yah sada pathet
Sa Rashtradharmanishtavan Akhandam Bharatam smaret || 33 ||

|| Bharat Mata Ki Jai ||